## चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः। (३६/६९८)

सुप् सुपा इति वर्तते। तस्य विशेषणमेतत्। तत् इति सर्वनाम्ना चतुर्थ्यन्तस्यार्थः परामृश्यते। तस्मै इदं तदर्थम्। तदर्थ अर्थ बलि हित सुख रक्षित इत्येतैः सह चतुर्थ्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। तदर्थेन [1]प्रकृतिविकारभावे समासोऽ[2]यमिष्यते। यूपाय दारु यूपदारु। [3]कुण्डलाय हिरण्यम् कुण्डलहिरण्यम्। इह न भवति, रन्धनाय स्थाली, अवहननाय उलूखलम् इति। [4]तादर्थ्ये चतुर्थी चास्मादेव ज्ञापकाद् भवति[5]।

[७८] अर्थेन [6]नित्यसमासवचनं सर्वलिङ्गता च वक्तव्या। (म.भा. १.३८८)

[7]ब्राह्मणार्थं पयः। ब्राह्मणार्था यवागूः (म.भा. १.३८८)। बलि--कुबेराय बलिः कुबेरबलिः[8]। [9]महाराजबलिः। [10]हित -- गोहितम्। अश्वहितम्। सुख -- [11]गोसुखम्। अश्वसुखम्। [12]रक्षित - गोरक्षितम्। अश्वरक्षितम्[13]॥

## पञ्चमी भयेन। (३७/६९९)

सुप् सुपा इति वर्तते। तस्य विशेषणमेतत्। पञ्चम्यन्तं [14]सुबन्तं भयशब्देन [15]सुबन्तेन सह समस्यते [16]विभाषा, तत्पुरुषश्च समासो भवति। वृकेभ्यो भयं वृकभयम्। [17]चौरभयम्। दस्युभयम्।

[७९] भयभीतभीतिभीभिरिति वक्तव्यम्। (म.भा. १.३९०)

[18]वृकेभ्यो भीतः वृकभीतः। वृकभीतिः। वृकभीः। पूर्वस्यैवायं बहुलग्रहणस्य (२.१.३२/६९४) [19]प्रपञ्चः। तथा च ग्रामनिर्गतः, अधर्मजुगुप्सुः [20]इत्येवमादि सिद्धं भवति॥

## अपेतापोढमुक्तपतितापत्रस्तैरल्पशः। (३८/७००)

अपेत अपोढ मुक्त पतित अपत्रस्त इत्येतैः सह[21] पञ्चम्यन्तं समस्यते, तत्पुरुषश्च समासो भवति। अपेत-- [22]सुखापेतः। [23]अपोढ--कल्पनापोढः। [24]मुक्त--चक्रमुक्तः। [25]पतित—स्वर्गपतितः। [26]अपत्रस्त--तरङ्गापत्रस्तः। अल्पशः इति समासस्याल्पविषयतामाचष्टे। अल्पा[27] पञ्चमी [28]समस्यते, [29]न सर्वा। प्रासादात् पतितः, भोजनादपत्रस्तः [30]इत्येवमादौ न भवति। 'कर्तृकरणे कृता बहुलम्' (२.१.३२/६९४) इत्यस्यैवायं प्रपञ्चः॥

---

1. प्रकृतिभावे विकारभावे च क. 2. अयम् नास्ति फ.ह.ग. 3. उदाहरणमिदं नास्ति फ. 4. तादर्थ्ये नास्ति क. 5. तदर्थेन भवति तदर्थः इत्यधिकम् क. 6. नित्यसमासः ग. 7. ब्राह्मणार्थः सूपः क. इ. फ. ह. ग. 8. कुमारबलिः इत्यधिकम् ह, भूतबलिः इत्यधिकम् ग. 9. महाराजाय बलिः इत्यधिकम् क. 10. हित नास्ति फ, गवे हितम् इत्यधिकम् क. 11. गवे सुखम् इत्यधिकम् ह. 12. रक्षित नास्ति फ. 13. वनम् इत्यधिकम् ह. 14. सुबन्तं नास्ति ब.क.इ.फ. 15. सुबन्तेन नास्ति ब.ड.फ ह. 16. विभाषा नास्ति ड.फ. 17. नास्ति फ.ड. 18. वृकेभ्यो भीतः नास्ति क. इ. ह. 19. उदाहरणप्रपञ्चः ड. ह. फ. 20. इत्येवमादिः फ. 21. अल्पशः इत्यधिकम् क.ड.इ.फ.ह. 22. सुखादपेतः इत्यधिकम् ड. इ, दुःखापेतः इत्यधिकम् ह. 23. अपोढ नास्ति फ. 24. मुक्त नास्ति फ. 25. पतित नास्ति फ. 26. अपत्रस्त नास्ति फ. 27. या इत्यधिकम् ड. 28. सा इत्यधिकम् ड. 29. न सर्वा नास्ति फ.ह. 30. इत्येवमादिषु समासो ह.